## काण्डान्तात् क्षेत्रे। (२३/४८१)

काण्डशब्दान्तात्[1] द्विगोस्तद्धितलुकि [2]सति क्षेत्रे वाच्ये ङीप् प्रत्ययो न भवति। द्वे काण्डे प्रमाणमस्याः [3]क्षेत्रभक्तेः, 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' (५.२.३७/१८३८) इति विहितस्य तद्धितस्य 'प्रमाणे लो द्विगोर्नित्यम्' (५.२.३७/१८३८ वा.) इति लुकि कृते, द्विकाण्डा [4]क्षेत्रभक्तिः। त्रिकाण्डा [5]क्षेत्रभक्तिः। काण्डशब्दस्यापरिमाणवाचित्वात् पूर्वेणैव प्रतिषेधे सिद्धे [6]क्षेत्रे नियमार्थं वचनम्। इह मा भूत्, द्विकाण्डी रज्जुः, [7]त्रिकाण्डी रज्जुः इति। [8]प्रमाणविशेषः [9]काण्डम्॥

## पुरुषात् प्रमाणेऽन्यतरस्याम्। (२४/४८२)

द्विगोः तद्धितलुकि इत्येव। प्रमाणे यः पुरुषशब्दः, तदन्ताद् द्विगोः तद्धितलुकि सति अन्यतरस्यां न ङीप् प्रत्ययो भवति। द्वौ पुरुषौ प्रमाणमस्याः परिखायाः द्विपुरुषा, द्विपुरुषी। [10]त्रिपुरुषा, त्रिपुरुषी। [11]अपरिमाणान्तत्वान् नित्ये प्रतिषेधे [12]प्राप्ते विकल्पार्थं वचनम्। प्रमाणे इति किम्? द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा। [13]त्रिपुरुषा। तद्धितलुकि इत्येव। [14]समाहारे – द्विपुरुषी। त्रिपुरुषी॥

## बहुव्रीहेरूधसो ङीष्। (२५/४८४)

ऊधस्शब्दान्ताद् बहुव्रीहेः स्त्रियां ङीष् प्रत्ययो भवति। 'ऊधसोऽनङ्' (५.४.१३१/४८३) इति समासान्ते कृते 'अनो बहुव्रीहेः' (४.१.१२/४६०) इति डाप्प्रतिषेधयोः प्राप्तयोरिदमुच्यते। घटोध्नी। कुण्डोध्नी। बहुव्रीहेः इति किम्? प्राप्ता ऊधः प्राप्तोधाः। 'अन उपधालोपिनोऽन्यतरस्याम्' (४.१.२८/४६२) इत्यस्यापि ङीपोऽयमुत्तरत्रानुवृत्तेर्बाधक इष्यते। समासान्तश्च स्त्रियामेव। [15]इह न भवति, महोधाः पर्जन्यः इति॥

## सङ्ख्याव्ययादेर्ङीप्। (२६/४८५)

पूर्वेण ङीषि प्राप्ते ङीब् विधीयते। सङ्ख्यादेः अव्ययादेश्च बहुव्रीहेरूधस्शब्दान्ताद्[16] ङीप् प्रत्ययो भवति। सङ्ख्यादेः तावत् – द्व्यूध्नी। त्र्यूध्नी। अव्ययादेः – [17]अत्यूध्नी। [18]निरूध्नी। आदिग्रहणं किम्? [19]द्विविधोध्नी, त्रिविधोध्नी इत्यत्रापि यथा स्यात्॥

## दामहायनान्ताच्च। (२७/४८६)

ऊधसः [20]इति निवृत्तम्। सङ्ख्याग्रहणमनुवर्तते, न अव्ययग्रहणम्। सङ्ख्यादेः बहुव्रीहेः दामशब्दान्तात् हायनशब्दान्तात् च स्त्रियां ङीप् प्रत्ययो भवति। दामान्तात् डाप्प्रतिषेधविकल्पेषु (४.१.१२, १३,२८/४६० – ४६२) प्राप्तेषु नित्यार्थं वचनम्। द्विदाम्नी। त्रिदाम्नी। [21]हायनान्ताद् टापि प्राप्ते (४.१.४/४५४)। द्विहायनी। [22]त्रिहायणी। चतुर्हायणी।

[३४२] हायनो वयसि स्मृतः। (म. भा. २.२१३)

तेनेह न भवति, द्विहायना शाला। [23]त्रिहायना। [24]चतुर्हायना। णत्वमपि त्रिचतुर्भ्याम् हायनस्य इति वयस्येव स्मर्यते॥

---

1. प्रातिपदिकात् इत्यधिकम् फ. 2. कृते ह. 3. क्षेत्रभक्त्याः ब. 4–5. भक्तिः ब. क. फ. ह. 6. क्षेत्रनियमार्थं ह. 7. उदाहरणमिदं नास्ति फ. 8. परिमाणविशेषः ग. 9. काण्डा ब. 10. त्रिपुरुषा नास्ति फ. 11. अपरिमाणात् फ, तद्धितलुकि क. ड. फ. 12. सिद्धे फ. 13. नास्ति फ. 14. समाहारे मा भूत्, पञ्चपुरुषी, दशपुरुषी क. ग. ड. फ, मा भूत्, पञ्चपूली ह. 15. तेन इत्यधिकम् क. 16. स्त्रियाम् इत्यधिकम् ह. 17. प्रत्यूध्नी क. फ, अभ्यूध्नी न्या. 18. नास्ति फ. 19. द्विविधोध्नी ब. 20. इति नास्ति फ. 21. हायनान्तादपि मुद्रितपुस्तकेषु. 22. त्रिहायनी अ. क. ड. 23–24. नास्ति फ, °शाला क. ड. ह.